# ॥ पञ्चमोऽध्याय: ॥

## पाणिनीयभोजव्याकरणयो: तुलनात्मकं अध्ययनम् ।

पाणिनीयं सारस्वतं चैतयो: व्याकरणपरम्परयो: विशदं साङ्गोपाङ्गं विवेचनं प्रस्तूयाऽस्मिन्नध्याये पाणिनीयव्याकरणस्य भोजव्याकरणान्तर्गत पद्येषु प्राप्तानां सन्दर्भानामेधोलिखित- प्रकारेण तुलनात्मकमध्ययनं प्रस्थाप्यते ।

(अ) भगवत: पाणिने: स्पष्टनामोल्लेख: इति विभागे सप्तोल्लेखा: चर्चिता: ।

(आ) पाणिनीयसूत्रतत्संज्ञानां सरलीकरणम् इति विभागे चत्वार: उल्लेखाश्चर्चिता: ।

(इ) पाणिनीयमतस्य साभारं स्वीकरणम् इति विभागे त्रय उल्लेखा: चर्चिता: ।

(ई) पाणिनीयसंज्ञाया: स्थापनम्-इति विभागे पाणिनीयसम्मता: संज्ञा: का: का: कुत्र कुत्र स्थापिता: तास्ता: ससंदर्भं चर्चिता: ।

(उ) पाणिने: तच्छास्त्रस्याऽपरोक्षोल्लेखा:-इति विभागे पाणिने: अष्टाध्याय्या: पाणिनीयानां च नामनिर्देशं विना ये ये सन्दर्भा: ते ते चर्चिता: ।

**(अ) भगवत: पाणिने: स्पष्टनामोल्लेख: ।**

१. भगवत: पाणिने: प्रामाण्यम् ।

पाणिनीय व्याकरणस्य अ इ उ ण् इति माहेश्वरसूत्रे विसन्धि: वर्तते । तस्यैव प्रमाणं स्वीकृत्य सारस्वतप्रत्याहारसूत्रे दृष्टस्य विसन्धे: प्रामाण्यं महोपाध्याय श्रीविनयसागर: साधयति । [(१)]

नित्यमसिच् प्रजामेधयो: (पा. ५, ४, १२२.) इति सूत्रानुसारेण मन्दा मेधा यस्य स: मन्दमेधा:, अल्पा मेधा यस्य स: अल्पमेध: इत्युदाहरणद्वयं काशिकायां प्राप्यते, न तु अष्टाध्याय्याम् । तथापि पाणिनिनाम्न: स्पष्टोल्लेखेन पाणिनिना इति पदस्य पाणिनीयेन काशिकाकारेण इत्यर्थोऽवगन्तव्य: । [(२)]

खद (९) स्थैर्ये हिंसायाम् चेति धातो: लुङ् - लकारे (अद्यतनभूतकाले) सारस्वतमते णित्पे (२, १.७८) इति सूत्रेण वृध्दिविहितं रूपं अरवादीदिति भवति । किन्तु पाणिनीय मते अतोहलादेर्लघो: (पा. ७, २.७,) इति सूत्रेण वृद्धिविधानस्य वैकल्पिकत्वात् वृद्धिरहितमखदीदित्यपि रूपं सम्भवति [(३)]

लङ् (अद्यतनभूतकाल) लकारे द्युत् [(८६)] धातो: विकल्पेन परस्मैपदं भवति, किन्तु पाणिनीय सूत्रानुसारेण पुषादिद्युताद्लृदित: परस्मैपदेषु (पा ३, १.५५) इति सूत्रानुसारेण परस्मैपदमेव भवति । यदा परस्मैपदं भवति तदा अद्युतत्, यदा चाऽऽत्मनेपदं भवति तदा अद्योतिष्ट इति रूपमपि भवति । अत्र पाणिनीयमते परस्मैपदं किन्तु सारस्वतमते उभयपदं भवति । [(४)]

तनु (२१४) विस्तारे धातो: लङ् लकारे (अद्यतन भूतकाले) पाणिनीयमते नित्यं करोते: (पा. ६, ४.१०८) इति सूत्रेण सिलोपस्य नित्यता उक्ता । तत्सूत्रस्य भावार्थं गृहीत्वा अकरोते: इति

निर्दिश्य तन्-धातोः अतत अतथाः अतनिष्ठाः इति रूपाणि साध्यन्ते। (५) अत्रेदं चिन्त्यं - **नित्यं करोतेः** सूत्रं विकरणार्थ उ-प्रत्ययस्य लोपत्वसाधनाय प्रवर्तते। अत्र तु करोतेरिति पाणिनीय निर्देशः अन्यसाधनार्थे प्रयोजितो दृश्यते।

भ्रस्जो (२२०) पाके धातोः लिट् लकारे(परोक्षभूतकाले) आर्धधातुकत्वात् **भ्रस्जो रोपधयो रमन्यतरस्याम्** (पा, ६, ४.४७) सूत्रेण सकाररेफयोः लोपे रम् - आगमो वा भवति। तेन बभ्रज्ज-बभर्ज्ज इत्यादि रूपाणि सिध्यन्ति। तस्यैतस्य सूत्रस्य ग्रहणं व्याख्यारूपेण कृतं दृश्यते। (६)

नश् (१८५) अदर्शने-धातोः लृङ् लकारे (भविष्यत्काले) आर्धधातुके प्रत्यये परे मस्ज्, नश् चेति धात्वोः मस्जिनशोर्झलि (पा. ७, २.६०) सूत्रानुसारेण नुमागमात् नंष्टा इति रूपं सम्पद्यते। नुमभावे विकल्पेन नशिता इति रूपं सिध्यति। (७)

**(आ) पाणिनीयसूत्रतत्संज्ञानां सरलीकरणम् ॥**

द्वितीयवृत्त्यारम्भे भ्वादिप्रक्रियायां भू-धातोः प्रक्रियायाः आरम्भसमये लटः (वर्तमानकालस्य) प्रत्ययाः अवतार्यन्ते। तत्र पाणिनेः नामोल्लेखः स्पष्टतया कृतो वर्तते यत्-तिबादीनां संज्ञा पाणिनिना कृता वर्तते, सैव भोजव्याकरणेऽपि गृह्यते। (८) किन्तु यथा तिबादि प्रत्ययगतानां स्वराणां व्यत्ययेन पाणिनिः तिप्तस्झिसिप्थस्थमिप्वस्मस् तातांझथासाथांध्वमिड्वहिमहिङ् (पा. ३, ४.७८) इत्येकेनैव सूत्रेण स्वल्पाक्षरत्वं साधयति, तेनैव प्रकारेण सारस्वतव्याकरणे एकेनैव सूत्रेण कार्यं साधितं न वर्तते। अपितु दशलकाराणां प्रत्ययाः पृथक्त्वेन अवतार्यन्ते। **अत एव तिप्-तस्-अन्ति-सिप्-थस्-थ-मिप्-वस्-मस्-ते-आते-अते** इति प्रत्येक लकारस्य प्रत्ययाः तत्तत्साधनिकारम्भे अवतारिताः।

अत्रेदमवश्यमभिप्रेतं यत् संस्कृतव्याकरणाध्ययनं सुकरं कर्तुं श्लाध्यः प्रयासः।

**ऊदितो वा** (सा.सू २, १.७०) सूत्रस्य व्याख्यानकाले पाणिनीयमतस्योल्लेखेन महोपाध्यायः विनयसागरः **स्वरतिसूतिसूयति धूञूदितो वा** (पा. ७, २.४४) सूत्रस्य स्वल्पं परिवर्तितं रूपं 'सूतिसूयतिस्वृधूञः वेट्' इति स्वरचितसूत्रं पुरःस्थापयति। अथवा पाणिनेरन्यतरस्य कस्यचित् व्याकरणसूत्रस्य निर्देशोऽपि भवेत्। (९)

मृङ्(२३४) प्राणत्यागे धातोः लिट् लकारस्य (परोक्षभूतकालस्य) साधनायां म्रियतेर्लुङ्लिङोश्च (पा. १, ३.६३) सूत्रे परिवर्जितान् (अनिर्दिष्टान्) लकारान् गृहीत्वा सन्नन्त -लृट्-लिट् प्रत्ययेषु परस्मैपदं विधीयते। अनेन महोपाध्यायःश्रीविनयसागरः पाणिनीयसूत्रकृत-मर्यादायाः बहिःस्थितान् प्रदेशान् निर्दिशति। (१०)

प्सा (११०) भक्षणे धातोः लङ्लकारे (ह्यस्तन भूतकाले) सारस्वतमते **उस्याऽऽलोपः** (सा. २, १.१२७) इति सूत्रेण उस्प्रत्यये परे आकारान्तधातोराकारस्य विकल्पेन 'लङः शाकटायनस्यैव' (पा. ३, ४.१११) इति पाणिनीयसूत्रस्य 'झेर्जुस्' इत्यस्य निर्देशो अन उस् इति कृत्वा अप्सुः अप्सान् इति रूपद्वयं साधितम्। (११)

**(इ) पाणिनीयमतस्य साभारं स्वीकरणम् ।**

नृति (१७५) गात्रविक्षेपे धातोः लृट् लकारे (सामान्य भविष्यत्काले) सि-प्रत्यय-रहितस्य आर्धधातुक-सकारादि-प्रत्ययस्य विकल्पेन इड् भवति । सेऽसिचिकृतचृतछृदतृदनृतः (पा. ७, २.५७) सूत्रानुसारेण इडभावे स्यपि नर्त्स्यति भवति । विकल्परहितं तु रूपं नर्तिष्यति इति सुविदितम् । [१२]

कृञ् (२४०) हिंसायाम् धातोः लङ्लकारस्य (अद्यतन भूतकालस्य) त-प्रत्यये परे सारस्वत-मते इडभावे गुणो भवति । तेन च सिच्-प्रत्यय-सहितम् 'अकर्ष्ट' रूपं सिध्यति । किन्तु ऋत इद्धातोः (पा. ७, १.१००) इति सूत्रोपरि 'इत्वोत्वाभ्यां गुणवृद्धी विप्रतिषधेन' (वा. ५४६)-इति वार्तिकबलात् गुणाभावाच्च अकीर्ष्ट इति रूपं विकल्पेन स्वीकरोति महोपाध्यायः विनयसागरः । [१३] (कर्षि ?)

खन् (९५) खनने धातोः लिङ् लकारे (विध्यर्थे) सारस्वतमतेन जनसनखनां झिति ये आकारो वा (सा २,१.१७९)-इति सूत्रेण यकारादि-प्रत्यये परे आकारान्तादेशस्य यो विकल्पो विधीयते, स एव विकल्पः पाणिनीयेऽपि जनसनखनां सञ्झलोः (पा. ६, ४.४२) इति सूत्रेण विहितो वर्तते । [१४]

**(ई) पाणिनीय संज्ञायाः स्थापनम् ॥**

लट् (वर्तमानकाल)लिङ् (विध्यर्थ) - लोट् (आज्ञार्थ) - लङ् (ह्यस्तनभूतकाल) इत्यादीनां रूपसाधनानन्तरं महोपाध्यायेन विनयसागरेण तिङ्शित्सार्वधातुकम् (पा.सू. ३, ४.११३), आर्धधातुकं शेषः (पा.सू. ३,४.११४) इति सूत्रद्वयस्य सरलतया व्याख्यानमिव कृतं वर्तते । उपरि निर्दिष्टानां चतूर्णां लकाराणां सार्वधातुकसंज्ञा एवं लिट् (परोक्ष भूतकालः ) लुट् (अद्यतन भूतकालः) लृट् (सामान्यभविष्यत्कालः), लेट् (वेदष्वेव उपयुक्तः) लुङ् (अद्यतन भूतकाल) एवं लृङ्लकारः (क्रियातिपत्यर्थः) एतेषां षण्णां आर्धधातुकसंज्ञा स्फुटं निर्दिष्टा । [१५]

हु (१५९)-दानादानयोः, धातोः लिङ् (विध्यर्थ) लकारस्य लेट् लकारवदर्थो यः छन्दसि क्रियते तस्याऽर्थस्याऽत्र सारस्वतसूत्रेऽभावादनावश्यकत्वाच्च निर्देशो न लभ्यते । किन्तु महोपाध्यायेनाऽस्य लेडिति निर्देशः कृतः पाणिनीयसंज्ञायाश्चोपदेशः कृतः दृश्यते । [१६]

चकासृ (१४३)-दीप्तौ धातोः लोट् (आज्ञार्थ) लकारस्य हि प्रत्यये परे झसाध्धिर्हेः (सा. २, २.२) इति सारस्वतसूत्रेण चकास् धातोः सकारस्य तकारे कृते चकाध्धि इति रूपं भवति । तत्तु काशिकाकार सम्मतम् । यद्यपि काशिकाकारेण ' धि च ' (पा. ८, २.२५) सूत्रे इष्टमेवैतच्चकाध्धि इति भाष्यमुद्धृत्य चकाधि इति रूपस्य विशेषण निर्देशः अत्र कृतो वर्तते । [१७]

आचार्यशब्दस्य परतः स्त्रीत्वविवक्षायां इन्द्रादेरानीप् च (सा. १, १२.२२) इति सूत्रेण आनीत् प्रत्यय विधानेन आचार्यानी इति रूपं निष्पद्यते । किन्त्वत्र आचार्यादणत्वं च (पा. ११३) इति वार्तिकबलेन नकारस्य णकारो न विहितः ।

महोपाध्यायः विनयसागरस्तु कौमुद्यामितिभाषणात् (१, १५.२४) इत्युक्त्वा निपातनेन णत्वरहितं आचार्यानी इति रूपं साधयति । [१८]

इदमत्र अनुसन्धेयं यदत्र रामचन्द्रशेषशर्मण: (पञ्चदशशताब्दी पूर्वाधीयस्य) प्रक्रियाकौमुद्या: एव निर्देश: कृत: यद्यपि चन्द्रकीर्तिमुने: (षोडशशताब्दीयस्य) सुबोधिका नाम्नि टीकायां अनेकश: प्रक्रियाकौमुद्या: स्पष्टतयोल्लेखा: प्राप्यन्ते ।

संख्यावाचक - त्रिशब्दस्य पाणिनेरनुसारं ' त्रेस्त्रय: ' (पा. ७, १.५३) इति सूत्रेण त्रयादेशो भवति । किन्तु सारस्वतसूत्रकार: अनुभूतिस्वरूपाचार्य: अत्र आचार्य शब्देन उल्लिखित: (न तु पाणिनिराचार्य:) । अनुभूतिस्वरूपाचार्येण तु त्रेरयङ् (सा. १-६.५३) सूत्रेण अयङ्प्रत्ययेन रूपं साधयितुं प्रवर्तितम् । अत: ङित्वात्अन्त्यस्य ङिवर्णस्य स्थाने अयङ्- आदेश: क्रियते । एतेन त्रय: इति रूपसिध्धि: समीचीना । (१९)

स्पृहिगृहिपतिशीङ्भ्य आलु: (सा. ३, ४.१५) इति सारस्वतसूत्रेण विहित: आलु-प्रत्यय: शीलेऽर्थे प्राय: सर्वै: आचार्यै: प्रदर्शित: इति स्पष्टयति महोपाध्याय:विनयसागर: । आचार्यै: - इति प्रयोग: पादपूरणार्थे गृह्येत चेत्तदपि अर्थानुसन्धाने न कोऽपि विशेष: दृश्यते । (२०)

भिदुर:, विदुर:, छिदुरश्च इति त्रयाणां शब्दानां सिध्यर्थं भिदिछिदि-विदिभ्य: कुरङ् (सा. ३, ४.१९) इति सारस्वतसूत्रेण केवलं 'कुरच् शीलेऽपि' इति संहृत्य भिदिछिदिविदीनां धातूनां प्रयोगेण महोपाध्याय: विनयसागर: धातूनां परिगणनं सूत्रे वर्तमानमपि न निर्दिशति । तत्र आचार्यै: - इत्युक्त्वा कार्यं च साधयति । (२१)

नपुंसकलिङ्गे कुल-शब्दस्य साधनाविधौ द्विवचने औ प्रत्ययस्य ईम आदेश: क्रियते । पाणिनीये तु औङ आप: (पा. ७, १.१८) सूत्रेण गुरुत्वात् औकारस्य स्थाने ईकार: क्रियते । अत्र तु मित्करणत्वेन अन्त्यात् स्वरात् परं ईम्-आदेशं कृत्वा कुले - इति रूपं साधयति ।

यद्यपि गुरु:शिच्च सर्वस्य (सा. १, ८.३) सूत्रेण सर्वस्य स्थाने आदेश: सुकर: भवेत्, तथापि सूत्रद्वयं "गुरु: शिच्च सर्वस्य" (सा. १, ८.३) ईमौ (सा. १, ८.२) चेति समानतया ग्रहणेन सारस्वतसूत्रकारस्य पाणिनेश्च समानरूपेण स्वीकार: कृत: महोपाध्यायश्रीविनयसागरेण । (२२)

सहि (सह्)धातो: सोढा इति, वह्-धातोश्च वोढा इति पदौ सहिवहोरोदवर्णस्य (पा. २, १.१७८) इति सूत्रेण सह् + ता - सोह् + ता - सोद् + ता - सोद् + ढा, अनन्तरं च सोढा इति सिध्यति । तथापि सोढा-वोढा इति पदद्वयं पूर्वाचार्यस्य पाणिने: प्रयोगस्य सिध्धस्वरूपं महोपाध्याय:श्रीविनयसागर: गृह्णाति । (२३)

प्राद्युपसर्गाणां व्याख्यानावसरे निस्-निर् इत्येतयो: नि: एवञ्च दुस्-दुर् इत्येतयो: दु:, इत्येतयो: नि:दुश्चेति द्वयो: समावेशेन विंशतिसंख्याका: उपसर्गा: एव गृहीता: ।

एतेषां समादेशनं चतुर्धा कृतम् (२४) तत् द्योतयन् सूरिभि: इत्युक्त्वा -

"धात्वर्थं बाधते कश्चित् कश्चित् तमनुवर्तते ।
तमेव विशिनष्ट्यन्यो-ऽनर्थकोऽन्य: प्रयुज्यते ॥ " (वाक्यपदीये--)

इति भर्तृहरेः पद्यं साभारं विन्यस्यति ।

सारस्वते सखिपत्योरीक् (सा. १-६.५०) इति सूत्रेण पाणिनेः 'शेषोध्यसखि ' (पा. १, ४.७), पतिः समास एव (पा. १, ४.८) इति सूत्रद्वयस्य स्थाने केवलमेकमेवसूत्रं गृह्यते सारस्वत-सूत्रकारेण । तस्याशयं प्रकटयितुं ईक्-इति ईगागमस्य दीर्घत्वं ना-निषेधार्थं निपात्यते । अतः सख्या सख्ये-सख्युः इति रूपाणि साधितानि । ना-प्रत्ययस्य निषेधोऽपि स्पष्टो भवति । (२५)

सरूपाणामेकशेष एकविभक्तौ (पा. १, २.६४) सूत्रोपरि काशिकायां स्पष्टीकृतं यत् ग्राम्यपशुसङ्घेश्वतरूणेषु स्त्री (पा. १, २.७३) पर्यन्तं सरूपाणां सजातीयानां मध्ये एकस्यैव अन्तिमपदस्य ग्रहणं कृत्वा संख्यानुसारं वचनं प्रयुज्यते ।

अनेन संदर्भेण महोपाध्यायश्रीविनयसागरस्य काशिकामहाभाष्ययोः सघनाभ्यासो दरीदृश्यते । (२६)

पूर्वसूरिभिः = पाणिनिवररुचिपतञ्जलिभिः इत्यभिप्रायेण अत्र तु पूर्वसूरिभिः पाणिनिवररुचिपतञ्जलिभिः इत्यभिप्रायेण अत्र तु कृपू (८९) कृप् धातोः रेफस्य ल वर्णो भूत्वा कल्पते इति रूपं भवति । एवञ्च ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम् - (वा.-१) इति वार्तिकबलात् कृप् इत्यस्य क्लृप् इति भूत्वा 'चक्लृपे' इत्यादीनि रूपाणि भवन्ति इति स्पष्टीकृतं वर्तते । (२७)

**(उ) पाणिनेः तच्छास्त्रस्याऽपरोक्षोल्लेखः ॥**

यद्यपि स्वस्राद्याः सप्त, पञ्चनाद्याश्च सङ्ख्यावाचकाः ' स्वस्रादीनामन्नन्तानां संख्यावाचिनां च न ' (वा. १, १२.८) इति वार्तिकबलेन ' ङीप् ' - इति स्त्रीप्रत्ययस्य योग्यत्वं नार्हन्ति । (२८)

अस्यैव पाणिनीयव्याकरणवार्तिकस्य सारस्वते त्रण ईप् (सा.सू.१,१२.६) इति सूत्रं रचितं इति महोपाध्यायःविनयसागरः स्पष्टं दर्शयति ।

सारस्वतसूत्रेषु ग्रन्थलाघवमेव प्रयोजनम् । अतः स्वरविषयकाणि, वेदविषयकाणि सूत्राणि च न ग्रथितानि ।

महोपाध्यायः विनयसागरस्तु उदात्त-अनुदात्त-स्वरित स्वरसंज्ञानां निर्देशमावश्यकं मत्वा उच्चैरुदात्तः (पा. १, २.२९), नीचैरनुदात्तः (पा. १, २.३०), समाहारः स्वरितः (पा. १, २.३१) सूत्राणां ग्रहणं करोति । (२९) अत एव सारस्वतसूत्रेषु पूर्त्यर्थं तस्य प्रयासः प्रशस्यः ।

आद्यन्ताभ्याम् (सा. १, १.७) इति सूत्रेण पाणिनीयसूत्रस्य आदिरन्त्येनसहेता (पा. १, १.७१) इत्यनेन सदृशं कार्यं साधयितुं प्रत्याहाराणां संख्यायाः नियमो नास्ति । अत एव पाणिनीये चत्वारिंशत् प्रत्याहाराः उदीरिताः ।

अत्रापि 'ग्रन्थान्तरे' इति निर्देशेन पाणिनीयव्याकरणस्य संख्यां निर्दिशन् सारस्वतसूत्रेषु विंशति संख्याकान् प्रत्याहारान् प्रमाणयति ।

पाणिनीयव्याकरणे महाभाष्यरचयितुः पतञ्जलिमहर्षेः प्रसिध्धा- "असिद्धं बहिरङ्गमन्तरङ्गे"

(प.५१) परिभाषा कारिकास्वरूपेण विद्वन्मनोहरतया प्रतिष्ठापिता । (३१)

विसर्जनीयस्य स: (सा. १-५.१) (पा. ८-३.३४) इति सूत्रस्य व्याख्यानावसरे सारस्वत व्याकरणे-एतस्यैव सूत्रस्य ग्रहणेन "शर्परे विसर्जनीय:" (पा. ८-३.३५) इति सूत्रस्याऽप्यन्तर्गणनं कृतं वर्तते । (३२)

मासस्याऽलोपो वा (सा. १-६.३५) इति सारस्वतसूत्रे मासशब्दस्य केवलस्य पृथग्ग्रहणेन पद्दन्नोमास्० (पा. ६-१.६३) इति सूत्रस्य सूचनं दृश्यते । (३३)

पूषन् शब्दस्य साधनावसरे सप्तम्या ङिप्रत्ययस्य प्राप्तौ विभाषाङिश्यो: (पा. ६.४-१३६) इति सूत्रेण अकारलोपे कृते पूष्णि इति । लोपाभावे तु पूषणि इति रूपद्वयं सिध्यति । (३४) किन्त्वत्र महोपाध्याय: विनयसागर: पूषन् शब्दस्य टिलोपेन पूषि इति रूपं साधयति । केषाञ्चित् मतेन, तत् कस्य मतेन इति स्पष्टं न ज्ञायते ।

स्त्रीप्रत्यय प्रकरणान्ते नौका-सुरैका-सुग्लौका इत्येतेषां शब्दानां ह्रस्वत्वं निषेधयन् महोपाध्याय:-विनयसागर: "ह्रस्वो वा स्त्रियाम्" (सा. १-१२-३) सूत्रस्थ 'वा' इति निपातस्य महत्वं प्रकटयति यत्-निपाता: अनेकेष्वर्थेषु निश्चयेन पतन्ति । तेषां भूरिश: अर्था: ग्रन्थभूयस्त्वभीतित: न निर्दिष्टा: । (३५)

'ग्रन्थान्तरात्' इति प्रयोगे प्रक्रियाकौमुदी तु प्रथमं स्थानं भजते । किन्तु पाणिनेरष्टाध्याय्यामपि गणपाठे निपाता: निर्दिष्टा: ते अत्र ग्राह्या: इति सूचयति ।

'लिङ्गार्थे प्रथमा' (सा. १-१३-१) इति सारस्वतसूत्रे स्पष्टीकरणाय 'लिङ्गार्थे' इत्यस्य पदस्य 'लिङ्गाद्यर्थे' इत्यर्थं प्रदाय 'कैश्चन' इति निर्दिश्य (३६) पाणिनीयव्याकरणस्य 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा' (पा. २-३-४६) इति सूत्रं सूचनम् नियतलिङ्गानियतलिङ्गादीनां उदाहरणानि प्रस्तूय व्याख्यानेन सूत्रार्थं स्पष्टयति ।

पाणिनीयसूत्रेण 'गोरतद्धितलुकि' (पा. ५-४-९२) इत्यत्र टच् प्रत्यय:, तत्पुरुषस्याङ्गुले: सङ्ख्याव्ययादे: (पा. ५-४-८६) इत्यनेन अ प्रत्यय:, बहुव्रीहौ ऽजबहु गणात् (पा. ५-४-७३) नद्युतश्च (पा. ५-४-१५३) इति सूत्रेण कप् प्रत्यय: इत्यादि समासान्त प्रत्ययानां टाडका: (सा. १-४-६६) इति सारस्वतसूत्रे अतिसंक्षप्तरूपं विहितं, तत् महोपाध्याय:विनयसागर: अत्र सूचयति । (३७)

कन्याया: कनीन च (पा. ४-१०-११६) इति सूत्रेण कन्याया: अनूढाया: अपत्यं कानीन: व्यास: कर्णो वा इत्यस्मात् कानीन: इति पदस्य ग्रहणं कृत्वा पौष्यां भव: पौषिण: इति दृष्टान्तद्वयं निर्दिश्य अपरे प्रयोगा: अन्यशास्त्रत: निर्दिश्य पाणिनीय व्याकरणम् सूचयति ।

'चतुरश्चलोपो ण्यणीययो:' (सा. १-१५-१९) अत्र चतुर् इति संख्यवाचक शब्दस्य पूरणार्थे ईय-प्रत्यये, य-प्रत्यये च तुरीय: - तुर्य: इति रूपद्वयं सिध्यति । तद्वत् अन्यदीयम् इत्यादय: अपरे प्रयोगा: लोकत: अन्यव्याकरणशास्त्रत: पाणिनीयव्याकरणस्य तद्धित साधनान्तर्गत पाञ्चमिकप्रकरणात् ज्ञेया: इति सिध्धम् । (३९)

त्यतनौ (सा. १-१५.२८) सूत्रेण भवाद्यर्थे किमित्येषां अद्यादेश्च त्य-तनौ प्रत्ययौ विधीयेते। किन्तु किमादिगणस्य (किम्-आदि) अद्यादिगणस्य च गणपाठः सारस्वतसूत्रे न निर्दिष्टः। अत एव महोपाध्यायःविनयसागरः स्पष्टतरं पाठकेभ्यो निवेदनं करोति यत्-प्रयोगाः पाणिन्यादीनां शास्त्रतः विज्ञेयाः। (४०) अतः प्राह्णेतनम्-प्रगेतनम्-आदिमम्-अन्तिमम् इत्यादीनां प्रयोगाणां अत्र सारस्वतसूत्रे ग्रन्थभूयस्त्वभीतितः निर्दिशाभावः।

तिज् निशाने (७०) धातोः प्रेरणार्थे ञि प्रत्यये कृते तेजयति इति निष्पद्यते। तदभावे पाणिनीयसूत्रानुसारेण गुप्तिज्किद्भ्यः सन् (पा. ३-१-५) इति सन्नन्तस्य तितिक्षते इति प्रयोगस्य क्षमार्थे यत् परिगणनं कृतं तत् महोपाध्यायः विनयसागरः ' अन्यशास्त्रतः ' इति निर्दिश्य तिजेः क्षमायाम् (वा. ५४८) इति वार्तिकस्य निर्देशं तितिक्षते क्षमायाम् (सा. २-१-३३२) इति कृत्वा विवक्षा शब्दस्य प्रयोगेण वार्तिकत्वं प्रस्थापयति। (४१)

पण (७४) व्यवहारे स्तुतौ चेति धातोः आत्मनेपदं सीमितम्। तत्र तु कारणं काशिकायां गुपूधुपूविच्छिपणिपनीभ्यः आयः (पा. ३-१-२८) इति सूत्रे वर्तते यत्-अनुबन्धश्च केवलं चरितार्थः, तेन आय प्रत्ययान्तात् नाऽत्मनेपदं भवति। इत्यस्य स्पष्टीकरणं कृत्वा (४२) पणते-अर्थव्यवहारं करोति-पणायति-स्तौति इति वर्तते। अत्र तु चरितार्थता उभयोः पदयोः अर्थानुसारं वर्तते। अर्थव्यवहारस्य कर्तुगामिक्रियाफलत्वात् परस्मैपदस्य च स्तुतौ कर्मगामीक्रियाफलपरत्वात्।

वच् (१३४) परिभाषणे धातोः क्रियापदं वक्ति इति भवति। अत्र पाणिन्यादि पूर्ववैयाकरणानां मतानुसारेण वच् धातोः अन्ते ' अन्ति ' इति प्रत्ययः न प्रयोक्तव्यः किन्तु वच्-अन्ति-वदन्ति इत्येवं भवति। (४३) इति कथितम्।

पचिनन्दिग्रहादेरयुणिनिः (सा. ३-१-१०) इति सारस्वतसूत्रस्य व्याख्यानावसरे पचादिगणस्य षोडऽशोदाहरणानि, नन्द्यादिगणस्य सप्तविंशत्युदाहरणानि, ग्रहादिगणस्य च एकादशोदाहरणानि इति चतुःपञ्चाशदुदाहरणानि प्रस्तूय अन्येषां उदाहरणानां समावेशनं शास्त्रान्तरात् (४४) कर्तव्यं, अथवा शास्त्रान्तरे कृतानां कविप्रयोगाणां समावेशनं कृत्वा अध्ययनं सम्पादितव्यम्।

पिष्टपेषणभयाद्वा ग्रन्थभूयस्त्वभीया वा महोपाध्यायविनयसागरेण सम्पूर्णतया कृदन्तप्रयोगाणां व्याख्यानं न कृतम्। (४५)

तेनैव प्रकारेण शीलाधिकारे उणादि प्रक्रियायां च पाणिनीयशास्त्रस्य नामाभिधानं विना तच्छास्त्रात् समावेशनकार्यस्य सूचनं स्पष्टतया कृतम्। तदेव स्पष्टयन् लिखति। (४६)

भगवतः पाणिनेः व्याकरणमाश्रित्य कतिचित्प्रयोगाः सुचारुरीत्या मया साधिताः। एवं च अन्ये प्रयोगाः अन्यव्याकरण-पाणिनीयादिव्याकरण साहाय्येन सिद्धिः भवति इति महोपाध्यायःविनयसागरः कथयति। (४७)

# पादटिप्पणी

(१) अ इ ऊ ऋ समाना: एषु सन्धिर्न कार्य:,
कथमिह यदि पृच्छेन्नास्ति वक्तुर्विवक्षा ।
शठहठकृतसन्धिरर्य्वादय: स्यु: समाना:,
अ इ उणिति विसन्धि: पाणिनीयेऽपि दृष्ट: ॥ (१, १.३)

(२) इह वा ग्रहत: स्वामिन् ! प्रयोगौभवतस्त्विमौ ।
मन्दमेधा अल्पमेधा: पाणिनिनेत्युदाहृतम् ॥ (१, १७.६८)

(३) सेर्णित्पे पर एव स्यात् अखादीच्च क्रिया यथा ।
पाणिनीये तु वा वृध्दि-रखादीत्पुनरित्यपि ॥ (२, १.१०९)

(४) भूते सौ च द्युतादिभ्यो वा परस्मैपदं भवेत् ।
लित्पुषादेर्यथा ङ स्यात् द्युतादिभ्य: पुनस्तथा ॥
अद्युतच्च यथा रूपं पाणिनीयमते परम् ॥ (२, १.३६४-अव, ३६४ कड)

(५) अकरोतेरिति व्याख्या पाणिनीय उदाहृता ।
यथाऽतताऽतथा: स्याच्चातनिष्ठा इति यत्क्रिया ॥ (२, ७.६)

(६) संयोगादे र्ईसाभावे ऽन्यत्रसोजश्च भृज्जति ।
भृज्जतेऽथ परे चाङग्रे पाणिनीनेत्युदाहृता: ।
लुप्त्वा सकाररेफौ रमागमो वाऽनपि स्युरेव यत् ।
बभ्रज्ज बभर्ज यपि - च बजर्ज्जिथ पुनर्हि बभ्रष्ठ ॥ (२, ८, ६/७)

(७) मस्जिनशोर्ईसे नुम् च पाणिनीय निदर्शनात् ।
नंष्टाऽथ नशिता स्वामिन् ! नक्ष्यतीति नशिष्यति ॥ (२,४.२५)

(८) भवन्ति प्रत्यया धातोर्वर्तमाने तिबादय: ।
एवमेषां परेषां च संज्ञा पाणिनिना कृता ॥ (२, १.१०)

(९) सेटामिट् यत्र निव्येऽपि ह्युदितो वा लिटं विना ।
सूतिसूयतिस्वृधूञ: पाणिनीयमते च वेट् (२, १.१०१)

(१०) स स्यप् तादौ परोक्षे च म्रियते: पं भवेदिह ।
पाणिनीयानुसारेण ममार मम्रतुर्यथा ॥ २, ८.३९ ॥

(११) अन उस् त्वत्र वक्तव्य: पाणिनीयानुसारत: ।
उस्यालोपे यथाऽप्सुश्च ह्यप्सानीति क्रियापदम् ॥२, २.७ ॥

(१२) सि प्रव्ययं विना वेद् च पाणिनीयमते स्फुटम् ।
नत्स्यर्ति नन्वनर्तिष्यद् अनर्तीदिति सौ परे ॥ २, ४.८ ॥

(१३) अकरिष्यदकरीष्य-ताकारीदकरिष्ट च ।
अकरीष्टेऽभावेऽथ ह्यकर्ष्टेति क्रिया भवेत् ॥
पाणिनीयमते ऽकीर्ष्ट तत्र क्विंति नास्ति च ॥ २, ९.१२-३९१ ॥ (कर्ष्टि ?)

(१४) जन सनखनां स्वामिन् ! पाणिनीयमते स्फुटम् ।
खायात् खन्यात् खनिषीष्टत्वखानीदखनिष्ट च ॥ २.१-३९१॥

(१५) सार्वधातुकसंज्ञा वै तद्विभक्तिप्रयोजनम् ।
परं तु पाणिनीयानां आर्धधातुकसंज्ञकम् ॥ (२,३.५)

(१६) संज्ञाऽस्य पाणिनीयानां लेडिति भाषिता मते ।
जुहुयाच्च जुहोतु स्यात् होहेर्वक्तव्य एव धि: ॥२, ३.५॥

(१७) चकास्यच्च चकास्तु स्यात् झसाद्धिर्हे: कृत: पुन: ।
चकाद्धि स्वमते रूपं भाष्ये धादौ सलोपता ॥ २, २.९४॥

(१८) आचार्यान्यत्र णत्वं न कौमुद्यामिति भाषणात् ॥ ७, १५.२४ ॥

(१९) गुरुत्वेनैव सर्वस्या-देशे प्राप्ते धरापते ।
ङिदन्त्यस्यैव वक्तव्य आचार्येणेति भाषितम् ॥ १, ७.८७ ॥

(२०) आलु-प्रत्यय आचार्यै: शीलेऽर्थेऽपि प्रदर्शित: ॥ ३, १.१५० ॥

(२१) कुरच् शीलेऽपि निर्दिष्ट आचार्यैर्ज्ञानशालिभि: ॥
भिदुरो विदुरश्चाऽथ छिदुरश्चेति सिद्धये ॥ ३, १.१५४ ॥

(२२) सर्वस्याऽपि गुरु: शिच्च वक्तव्यो भो: पुनस्तथा ।
स्वरात्परो मिदन्त्याद्धि पूर्वाचार्य विवक्षया ॥ १, ९.३ ॥

(२३) सहिवहोरोदवर्ण-स्य ढलोपे कृते यथा ।
सोढा भवेत् पुनर्वोढा पूर्वाचार्यनिरूपणात् ॥ (३, १.७) ॥

(२४) प्राग्धातोश्च भवेत् प्रादिरूपसर्गस्त्वयं खलु ।
चतुर्धा स समादिष्ट: शास्त्रान्तरे च सूरिभि: ॥ १. १४.१८ ॥

(२५) सूत्रेऽत्र सखिपत्योरीक् दीर्घत्वं यच्च वर्तते ।
ना-निषेधाय भो राजन् ! इत्याहु: पूर्वसूरय: ॥ १, ६.७८ ॥

(२६) एकवद्भवतीतीह सर्वो द्वन्द्वो विभाषया ।
काशिकायां महाभाष्य इत्युक्तं पूर्वसूरिभि: ॥ १, १७.५७ ॥

(२७) स्याद्द लृ इति लोकाच्च विवक्षा पूर्वसूरिभि: ।
कृता भवेत् यथा विद्वन् ! चक्लृपे च क्रियापदम् ॥ २, १.३७३ ॥

(२८) स्वस्रादीनामृकारत्वे नान्ते संख्यावतां न ङीप् ।
स्वस्राद्या: पञ्चानाद्या ङी-ती च प्राक्विभाषणात् ॥ (१, १५.१६) ॥

(२९) उच्चैरूदात्तकत्तेषां नीचैस्तथानुदान्तक: ।
स्वरित: समवृत्त्या स्या-दित्यपाठ्यन्यशास्त्रत: ॥ १, १.१३ ॥

(३०) प्रत्याहारस्य संख्याया: नियमो नेति हेतुत: ।
यथैह विंशति: ख्याता - स्तेभ्यो ग्रन्थान्तरेऽधिका: ॥ १, १.२७ ॥

ग्रन्थान्तरे इत्यस्य काशिकायामिति निर्णीय --

एकस्मान् ङञणवटा, द्वाभ्यां षस्त्रिभ्य एव कणमा: स्यु: ।
ज्ञेयौ न्चयौ चतुर्भ्यो र: पञ्चभ्य: शलौ षड्भ्य इति ॥ (पृष्ठम् - ६)

(३१) अन्तरङ्गे हि कार्ये स्याद् बहिरङ्गं निरर्थकम् ।
एवं न्याय समालोक्या-न्तरङ्गं बलवद् विदु: ॥ १, २.३ ॥

(३२) विसर्जनीयस्य स एव राजन् ! खसे परे स्यात् खलु कस्तनोति ।
रीत्याऽनयाऽनेक विशिष्ट शिष्टै-र्मान्या प्रयोगा अपरे भवन्ति ॥ (१, ५.१ ) ॥

(३३) मासस्या लोपो वा भवति नृपते ! स्वादिषु यथा,
द्विधाऽयं शब्द: स्यात् स्वमतमिह व्याख्यातमिह तै: ।
अष्यचत्वारिंशन्ननु सकलरूपाणि तु तदा,
सप्ताधिकानि स्यु: पुनरपि हि केचित् कविमते ॥ १, ७.४९ ॥

(३४) रीत्याऽनया प्रभो साध्यौ वै पूषार्यमणानुभौ ।
टिलोपेवाऽत्र पूष्णौ ङौ केचिदिति विशेषता ॥ १, १०.३९ ॥

(३५) निश्चयेन पतन्येवाऽनेकैष्वर्थेष्विति स्फूटम् ।
निपातास्ते तु विज्ञेया ग्रन्थान्तरात्तु भूरिश: ॥ १, १६.२ ॥

(३६) लिङ्गार्थे प्रथमा वाच्या तत्सत् ब्रह्म यथा स्फुटम् ।
लिङ्गादयोऽपि हे राजन् ! प्रथमार्था हि कैश्चन ॥ १, १६.२ ॥

(३७) टाडका प्रत्यया: यत्र वाञ्छिता: पूर्वसूरिभि: ।
ते तु तत्रैव कर्तव्या यथा पञ्चगवं द्विगौ ॥ १, १७.६१ ॥

(३८) कानीनोऽप्यथ पौषण: सहादित्वात् यलोपता ।
प्रयोगा: एवमन्येऽपि ज्ञातव्या अन्यशास्त्रत: ॥ १, १८.२२ ॥

(३९) चतुरश्चलोप ईये च ये तुरीयस्तथैव तुर्यश्च ।
दक् स्यादन्यस्ये येऽ - न्यदीयमपरेऽपि लोकतो ज्ञेया: ॥ १, १८.१५ ॥

(४०) श्वस्तनो ह्यस्तनोऽप्येवं चिरन्तन: सदातन: ।
एवमन्येऽपि विज्ञेया: प्रयोगा: अन्यशास्त्रत: ॥ १, १८.२२ ॥

(४१) भवेत् तिज् निशाने ञि कृते तेजयतीति च ।
तितिक्षते क्षमायां स्याद् प्रयोगा: पूर्वशास्त्रत: ॥ १, १८.२५ ॥

(४२) केवलं चरितार्थत्वात् अनुबन्धस्य भूपते ! ।
पणायति यथा रूपं वे ति केचित् पठन्ति च ॥ २, १.३४० ॥

(४३) (अमार्क्षीद्) वक्ति धातोश्च योऽस्ति वच् परिभाषणे ।
वचि नैव प्रयोक्तव्यो-तिपर: प्राक्कवीच्छया ॥ २, २.५९ ॥

(४४) पचादावप्युदाहार्या: प्रयोगा: अस्य सदृश: ।
शास्त्रान्तरात् समालोक्य यतोऽयमाकृतिगण: ॥ ३, १६ ॥

(४५) शास्त्रान्तरे शास्त्रविदाऽपरेऽपि ये सम्प्रयुक्ता: कविना प्रयोगा: ।
धार्या हि तस्मान्नृप भोजराजन् ! संख्या न लब्धेह मयेति हेतो: ॥ ३, २२ ॥

(४६) शीलाधिकारे कतिचित्प्रयोगा: शास्त्रान्तरात् संलिखिता: प्रसिद्धा: ।
उणादिकान् तान् कतिचित्प्रयोगान् उद्धृत्यलोकादथ संलिखामि ॥ ३, १६४ ॥

(४७) संसाधिता मे कतिचित्प्रयोगा: श्रीपाणिनीयाशयमत्र कृत्वा ।
श्रीशारदाया वचनाच्च लोकाच्छेषस्यसिद्धिस्त्विति भोजभूप ! ॥ ३.२४६ ॥